**This question paper contains 2 printed pages.** **May-June, 2024**

| | | |
|---|---|---|
| **Roll No.** | **:** | |
| **Unique Paper Code** | **:** | **121302407** |
| **Title of the Paper** | **:** | **महाभाष्य एवं वाक्यपदीय** |
| | | **Mahābhāṣya and Vākyapadīya** |
| **Group** | **:** | **D** |
| **Course Type** | **:** | **EC** |
| **Name of the Course** | **:** | **M.A., Sanskrit, LOCF** |
| **Semester** | **:** | **IV** |
| **Duration** | **:** | **3 Hours** |
| **Maximum Marks** | **:** | **70** |

**Write your Roll No. on the top immediately on receipt of this question paper**
**(इस प्रश्नप्रत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाँक लिखिए।)**

**Note:** Unless otherwise required in a question, answers should be written in **Sanskrit** or in **Hindi** or in **English** but the same medium should be used throughout the paper.

**टिप्पणी:** अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** किसी एक भाषा में दीजिए, परन्तु सभी प्रश्नों का माध्यम एक ही होना चाहिए।

1. निम्नलिखित की व्याख्या कीजिए: **4x7= 28**

   Explain the following:

   i. दुष्टः शब्दः स्वरतः वर्णतः वा मिथ्या प्रयुक्तः न तमर्थमाह।
   सः वाग्वज्रो यजमानं हिनस्ति यथा इन्द्रशत्रुः स्वरतोऽपराधात्।।

   **अथवा/OR**

   याज्ञिकाः पठन्ति दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात्घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति। न चान्तरेण व्याकरणं कृतः तद्धिताः वा शक्याः विज्ञातुम्।

   ii. आकृतौ अपि पदार्थे एषः विग्रहः न्याय्यः सिद्धे शब्दे अर्थे सम्बन्धे च इति। ननु च उक्तमाकृतिः अनित्या इति। न एतदस्ति। नित्या आकृतिः। कथम्। न क्वचितुपरता इति कृत्वा सर्वत्र उपरता भवति। द्रव्यान्तरस्था तु उपलभ्यते। अथवा न इदमेव नित्यलक्षणं ध्रुवं कूटस्थं अविचालि अनपायोपजनविकारि अनुत्पत्ति अवृद्धि अव्ययोगि इति तन्नित्यं इति। तदपि नित्यं यस्मिन्तत्त्वं न विहन्यते। किं पुनः तत्त्वम्। तद्भावः तत्त्वम्। आकृतौ अपि तत्त्वं न विहन्यते। अथवा किं नः एतेन इदं नित्यं इदमनित्यम् इति। यन्नित्यं तं पदार्थं मत्वा एषः विग्रहः क्रियते सिद्धे शब्दे अर्थे सम्बन्धे च इति।

   **अथवा/OR**

यदि तर्हि लोकः एषु प्रमाणं किं शास्त्रेण क्रियते। लोकतः अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते। किम् इदं धर्मनियम इति? धर्माय नियमो धर्मनियमः, धर्मार्थो वा नियमः धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः। यथा लौकिकवैदिकेषु । प्रियतद्धिताः दाक्षिणात्याः। यथा लोके वेदे च इति प्रयोक्तव्ये यथा लौकिकवैदिकेषु इति प्रयुञ्जते। अथ वा युक्तः एव तद्धितार्थः। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावद् 'अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यः ग्राम्यशूकरः' इति उच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थम् उपादीयते। शक्यं च अनेन श्वमांसादिभिः अपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते। इदं भक्ष्यम्, इदमभक्ष्यम् इति।

iii. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

**अथवा/OR**

आण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः।
वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम्॥

iv. अविकारस्य शब्दस्य निमित्तैर्विकृतो ध्वनिः।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत्॥

**अथवा/OR**

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः॥

2. निम्नलिखित में से किन्हीं **चार** पर लघु टिप्पणी लिखिए, जिनमें से एक **संस्कृत** में होनी चाहिए। **5+5+5+7=22**
Write short notes on any **Four** of the following, one of which must be written in **Sanskrit**.
शब्दब्रह्म, जन्मादि षड्विकार, वैकृत ध्वनि, वाणी के तीन भेद, असन्देह, ऊह, लक्ष्यलक्षणे व्याकरणम्, पाणिनि के मत में पदार्थ

3. निम्नलिखित में से किन्हीं **दो** का विशद विवेचन कीजिए - **2x10=20**
Elaborate any **two** of the following-
   i. "गौः" इत्यत्र कः शब्दः
   ii. सिद्धे शब्दार्थसम्बन्धे
   iii. शब्द की ग्राह्यत्व और ग्राहकत्व शक्तियाँ
   iv. स्फोट